শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥ ঊর্ধ্বপুণ্ড্রধ্যানশ্লোকাঃ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥ ঊর্ধ্ৱপুণ্ড্রধ্যানশ্লোকাঃ ॥

ললাটে সততং দেৱ্যা শ্রিযা সহ ৱিরাজিতম্।
চতুশ্চক্রং নমস্যামি কেশৱং কনকপ্রভম্॥ ১ ॥

অমৃতোদ্ভৱযা দেৱ্যা সমাশ্লিষ্টম অথোদরে।
নারাযণং ঘনশ্যামং চতুশ্শঙ্খং নমাম্যহম্॥ ২ ॥

নিত্যং কমলযাশ্লিষ্টং হৃদযে করুণাম্বুধিম্।
মাধৱং মণিভঙ্গাভং চিন্তযামি চতুর্গদম্॥ ৩ ॥

দেৱ্যা চ চন্দ্রশোভিন্যা মম কণ্ঠে ৱিরাজিতম্।
চন্দ্রভাসং চতুশ্শার্ঙ্গং গোৱিন্দম অভিসংশ্রযে॥ ৪ ॥

ৱিষ্ণুপত্ন্যাখ্যযা দেৱ্যা কুক্ষৌ দক্ষিণপার্শ্ৱগম্।
ৱিষ্ণুং চতুর্হলং ৱন্দে পদ্মকিঞ্জল্কসন্নিভম্॥ ৫ ॥

ৱৈষ্ণৱীসঞ্জ্ঞযা দেৱ্যা কলিতং দক্ষিণে ভুজে।
চতুর্মুসলম্ অব্জাভং সংশ্রযে মধুসূদনম্॥ ৬ ॥

কণ্ঠস্য দক্ষিণে পার্শ্ৱে ৱরারোহাধিপং প্রভুম্।
অগ্নিৱর্ণং চতুঃখড্গং ভাৱযামি ত্রিৱিক্রমম্॥ ৭ ॥

হরিৱল্লভযা দেৱ্যা ৱামকুক্ষৌ স্থিতং হরিম্।
ৱামনং বালসূর্যাভং চতুর্ৱজ্রং ৱিভাৱযে॥ ৮ ॥

ৱামবাহৌ মহাবাহুং শার্ঙ্গিণ্যাঃ পতিমৱ্যযম্।
শ্রীধরং পুণ্ডরীকাভং চতুঃপট্টং সমাশ্রযে॥ ৯ ॥

দেৱদেৱিকযা দেৱ্যা ৱামকণ্ঠে ৱিভাসিতম্।
চতুর্মুদ্গরম অভ্যেমি হৃষীকেশং তটিতপ্রভম্॥ ১০ ॥

কটিমধ্যগযা দেৱ্যা মহালক্ষ্ম্যা ৱিরাজিতম্।
পঞ্চাযুধং পদ্মনাভং প্রণমাম্যর্করোচিষম॥ ১১ ॥

www.prapatti.com

কাকুদে সুরসুন্দর্যাঃ পতিমদ্ভুতরূপিণম্।
দামোদরং চতুঃপাশং ইন্দ্রকোপনিভং ভজে॥ ১২ ॥

সর্ৱেষামখিলাভীষ্ট ফলদাশ্লিষ্টৱিগ্রহম্।
ৱাসুদেৱমুপাসেহং পূর্ণেন্দ্ৱযুতসন্নিভম্॥ ১৩ ॥

॥ ইতি ঊর্ধ্ৱপুণ্ড্রধ্যানশ্লোকাঃ সংপূর্ণা ॥

www.prapatti.com